International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(3): 22-23
© 2019 IJSR
www.anantaajournal.com
Received: 07-03-2019
Accepted: 12-04-2019

**पीला राम साहू**
षोधच्छात्रः षा.संस्कृत महाविद्यालयः
रायपुरम्, छत्तीसगढ़, भारत

**Correspondence**
**पीला राम साहू**
षोधच्छात्रः षा.संस्कृत महाविद्यालयः
रायपुरम्, छत्तीसगढ़, भारत

# संस्कृतसाहित्ये विष्वबन्धुत्वम्

## पीला राम साहू

### प्रस्तावना

संस्कृतभाषा सर्वासां भाषाणां जननी अस्ति। संस्कृत भाषा सर्वासु भाषासु प्रषस्यतमा वर्तते। अस्याः साहित्यं प्रषस्यतममस्ति। पुरेयं भारतीयानां राष्ट्रभाषा जनभाषा धर्मभाषा लोकभाषा चासीत्। संस्कृतभाषायामेव संस्कृतसाहित्यमवलम्बितम्। संस्कृतसाहित्ये सर्वेषां जनानां कल्याणकामना क्रियते। यतो हि कथितमस्ति –

> ”सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
> सर्वे भद्राणि पष्यन्तु मा कष्चिद्दुःखभाग् भवेत्।।”

संस्कृतसाहित्ये चत्वारो वेदाः, ब्राह्मणग्रन्था आरण्यकग्रन्था उपनिषदादयष्च वर्तन्ते। सहैव वाल्मीकेरादिकाव्यं रामायणम्, वेदव्यासस्य महाभारतम् अष्टादषपुराणानि च, भासस्य नाट्यहासः, कविकुलगुरोः कालिदासस्य काव्यविलासः, हर्षस्य हर्षातिरेकः, भवभूतेर्महानुभूतिः, बाणस्य पञ्चबाणाः इत्यादयः बहूनां बुधानां ग्रन्थाः संस्कृतसाहित्योपवनस्य चारुतां वर्धयन्ति। अध्यात्म– नीति–धर्मार्थकाममोक्ष –मन्त्र –तन्त्र–यन्त्र–दर्षन–काव्यायुर्वेद–गणितादिविषयेषु अनेके ग्रन्थाः संस्कृत साहित्ये उपलभ्यन्ते। मैक्समूलरमहोदयः एवं कथयति

> (Sanskrit is the greatest literature in the world, the most wonderful and the most Perfect.)

मानवसमाजः देष–काल–परिस्थित्यनुसारेण सांस्कृतिकसमत्वेन, धार्मिकसमरसतया, सहनषीलतया, सौहार्देण, सहयोगेन, समर्पणेन च एकस्मिन्नेव भूभागे, एकस्मिन्नेव केन्द्रियनेतृत्वे संपोषितः भवति। अत एव स्पष्टं भवति यद् राष्ट्रमेव प्रजाः प्रजाष्चैव राष्ट्रम्। तथैव विष्वमेव विष्वस्य जनः विष्वस्य जनैव विष्वम्। साहित्यं संस्कृत्याः अग्रदूतम्। साहित्ये यथार्थचित्रणं भवति। संस्कृतसाहित्ये संकीर्णतायाः किमपि स्थानं नास्ति। फलतः संस्कृतसाहित्ये विष्वबन्धुतायाः भावना सर्वथा परिव्याप्तास्ति। अथर्ववेदे पृथिवीसूक्तस्य मन्त्रोऽयम् –

> ”माता भूमिः पुत्रोऽहं पृथिव्याः।” [2]

एतत् श्रुतिवचः भारतभूमिं प्रति पुत्रवदात्मीयतायाः भावं सदा उद्भावयति। प्राकृतिकतत्त्वानां शान्तिसमृद्ध्यर्थं शुक्लयजुर्वेदे वैदिकऋषिः स्तवनं करोति यत्–
”द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः षान्तिः वनस्पतयः षान्ति र्विष्वेदेवाः शान्तिः ब्रह्म शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि। शान्तिः शान्तिः शान्तिः।। ” [3]
वैदिक ऋषिः जगदीष्वरस्य प्रार्थनां केवलं व्यष्टेः कल्याणाय न करोति प्रत्युत स सम्यग्समष्ट्याः मङ्गलकामनायै स्तवनं करोति। सः व्यक्तिगतसुखं त्यक्त्वा विष्वस्य समृद्ध्यर्थं मंगलाय च प्रार्थनां करोति –

> ”विष्वानि देव सवितर्दुरितानि परासुव।
> यद् भद्रं तन्न आ सुव।।” [4]

वैदिकर्षिः भगवन्तं प्रार्थयति यत् स मानवकल्याणाय सुमतिं सद्भावनां च धारयेत् –

"यॉंष्च पष्यामि यॉंष्च न।
तेषु मा सुमति कृधि ।। [5]

विष्वषान्त्यर्थं विष्वबन्धुत्वस्य भावना परमावष्यकी। मानवेषु सौहार्द्र – मैत्री– सहायानां भावनायाः उपलब्धिः नितान्तस्वाभाविकी –

मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे।
मित्रस्य चक्षुषा समीक्षामहे।। [6]

ऋगथर्ववेदयोः यानि विषिष्टसूक्तानि सन्ति तेषु सांमनस्य सूक्तमपि अभिधीयते। अस्मिन् सूक्ते विष्वकल्याणस्य भावना निहिता।

"सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे सं जानाना उपासते।।"
समानो मन्त्राः समितिः समानी, समानं मनः सह चित्तमेषाम्।
समानं मन्त्रमभिमन्त्रये व, समानेन वो हविषा जुहोमि।।
समानी व आकूतिः समाना ह्रदयानि वः।
समानमस्तु वो मनो, यथा वः सुसहासति।। [7]

भवन्तु सर्वे एकीभूताः । एकीभूत्वा वदन्तु। मिलित्वा एव ज्ञानलाभं कुर्वन्तु। सर्वे सहसम्पर्कैः तिष्ठन्तु, सौमनस्यं निर्मान्तु। यथावसरे यथायोग्यं स्व महत्त्वपूर्णदायित्वं पूर्णं कुर्वन्तु। सर्वे मिलित्वा मंत्रणां कुर्वन्तु। सर्वे मिलित्वैव विष्वकल्याणं कुर्वन्तु। ऋषयः केवलं स्वकल्याणाय ईष्वराराधनां न कुर्वन्ति प्रत्युत सर्वेषां मानवानां कल्याणाय प्रार्थनां कुर्वन्ति–

"अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम् ।।" [8]

"अयं निजः अयं परस्य च" इत्येषा गणनां तु केवलं क्षुद्रचित्तमानवः एव करोति, परं सम्पूर्णा वसुधा अस्माकं कुटुम्बमस्ति इति उदारचरितः मानव एव करोति। विष्वबन्धुत्वस्य भावना एतादृषी भवति। अर्वाचीनकाले परिवहनसाधनेन एकस्य देषस्य मानवाः अपरस्य देषस्य मानवैः सह स्वावष्यकतानुसारेण परस्परम आकृष्टाः भवन्ति। प्राचीनकाले भारतस्य निवासिनः न केवलं विष्वबन्धुत्वस्य भावनायामेव विष्वासं कुर्वन्ति स्म प्रत्युत स्वदैनन्दिनजीवने तस्य व्यवहारमपि कुर्वन्ति स्म। रघुवंषमहाकाव्ये दिलीपः कामधेनोः पुत्र्याः नन्दिन्या अनुगमनं करोति –

"स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः।
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत्।"

अत्रापि गोसेवायाः माध्यमेन दिलीपः विष्वबन्धुतायाः भावनां प्रदर्षयति। प्रजानां सुखमेव सुखमिति मत्वा राजा परेषां सुखस्य कामनां करोति –

"प्रजासुखे सुखं राज्ञः प्रजानां तु हिते हितम्।
नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम् ।। [10]

अत्र वयं पष्यामः यद् राजा विष्वप्रजानां सम्यग् रक्षणार्थं तासां सुखदुःखादिभावनाभिः समभावेनाश्रितो भवति । प्रजासंघेन प्रजावृद्धिः राष्ट्रविष्वस्य च समृद्धिः – अतः प्रजाहितमेव सर्वेषां हितमस्ति। श्राद्धावसरे न केवलं मनीषीषु मानवेषु प्रत्युत नागेषु सर्वेषु क्षुद्रजीवेषु अपि जलाञ्जलिं दत्त्वा तृप्तिः प्रदीयते एषः सार्वभौमनियमः। अनेन मानवः अन्य जीवैः सह सम्पर्कं स्थापयित्वा विष्वबन्धुत्वस्य भावनां साकारां करोति। श्रीमद्भगवद्गीतायाः श्लोकोऽयं अतिप्रासंगिकोऽस्ति –

"विहाय कामान्यः सर्वान्पुमांष्चरति निःस्पृहः।
निर्ममो निरहंकारः स शान्तिमधिगच्छति।।" [11]

जगतः स्वास्थ्यसमृद्धिः प्रजानां स्वास्थ्यसमृद्धेः उपरि आश्रिता भवति। प्रजानां व्यसनेभ्यः रक्षां प्रति तथा स्वास्थ्यसमृद्धिं प्रति च प्राचीनकालादेव ध्यानं दीयते स्म। प्रजानां मध्य एव कुषलाः शासकाः षिक्षकाः चिकित्सिकाः आरक्षकाः न्यायविदष्च प्राप्यन्ते। अतः सर्वेषां विष्वव्यापिनां जीवानां सर्वकल्याणाय कामना क्रियते अत्र –

"सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै।
तेजस्विनावधीतमस्तु मा विद्विषावहै।। [12]

विष्वबन्धुत्वस्य भावना एकः दार्षनिकपक्षः अस्ति। एतदखिलं जगत् परमैष्वर्यमण्डितस्य सत्यज्ञानानन्तस्य परब्रह्मणः विवर्तः। जगतः मध्य एक एव सर्वषक्तिमान् ईष्वरः अवस्थितः। विष्वस्य सर्वे जीवाः परमपितुः अपत्यमस्ति। भारतीयसंस्कृतेः निर्वाहकः संस्कृतसाहित्यमेव। अनेन प्रकारेण स्पष्टमस्ति यत् संस्कृतवाङ्गमयं राष्ट्रियवैष्विकभावनया पूर्णमस्ति।
अतः विष्वष्य सर्वेषां मनीषिणां कर्तव्यमस्ति यत् राष्ट्रविष्वहिताय संस्कृतसाहित्याानां चिन्तनं कुर्यात् ।